Supplement to page 62

Verses to be inserted between 839 - 840

८३९.१ ज्वलतः सर्वतोऽजस्त्रं चित्तस्थानेषु तिष्ठतः ।
यस्य चिन्मात्रदीपस्य भासा भाति जगत्त्रयम् ।। ३.९.५६
८३९.२ यं विनाऽर्कादयोऽप्येते प्रकाशास्तिमिरोपमाः ।
सति यस्मिन् प्रवर्त्तन्ते त्रिजगन्मृगतृष्णिकाः ।। ३.९.५७
८३९.३ सस्पन्दे समुदेतीव निःस्पन्दान्तर्गते न च ।
इयं यस्मिन् जगल्लक्ष्मीरलात इव चक्रता ।। ३.९.५८
८३९.४ जगन्निर्माणविलयविलासो व्यापको महान् ।
स्पन्दास्पन्दात्मको यस्य स्वभावो निर्मलोऽक्षयः ।। ३.९.५९
८३९.५ स्पन्दास्पन्दमयी यस्य पवनस्येव सर्वगा ।
सत्ता नाम्नैव भिन्नेव व्यवहारान्न वस्तुतः ।। ३.९.६०
८३९.६ सर्वदैव प्रबुद्धो यः सुप्तो यः सर्वदैव च ।
न सुप्तो न प्रबुद्धश्च यः सर्वत्रैव सर्वदा ।। ३.९.६१
८३९.७ यदस्पन्दं शिवं शान्तं यत्स्पन्दं त्रिजगत्स्थितिः ।
स्पन्दास्पन्दविलासात्मा य एको भरिताकृतिः ।। ३.९.६२
८३९.८ आमोद इव पुष्पेषु न नश्यति विनाशिषु ।
प्रत्यक्षस्थोऽप्यथाऽग्राह्यः शौक्ल्यं शुक्लपटे यथा ।। ३.९.६३
८३९.९ मूकोपमोऽपि योऽमूको मन्ता योऽप्युपलोपमः ।
यो भोक्ता नित्यतृप्तोऽपि कर्त्ता यश्चाऽप्यकिञ्चनः ।। ३.९.६४
८३९.१० योऽनङ्गोऽपि समस्ताङ्गः सहस्त्रकरलोचनः ।
न किञ्चित्संस्थितेनाऽपि येन व्याप्तमिदं जगत् ।। ३.९.६५
८३९.११ निरिन्द्रियबलस्याऽपि यस्याऽशेषेन्द्रियक्रियाः ।
यस्य निर्मननस्यैता मनोनिर्माणरीतयः ।। ३.९.६६
८३९.१२ यदनालोकनाद् भ्रान्तिसंसारोरगभीतयः ।
यस्मिन् दृष्टे पलायन्ते सर्वाशाः सर्वभीतयः ।। ३.९.६७
८३९.१३ साक्षिणि स्फार आभासे ध्रुवे दीप इव क्रियाः ।
सति यस्मिन् प्रवर्तन्ते चित्तेहाः स्पन्दपूर्विकाः ।। ३.९.६८
८३९.१४ यस्माद् घटपटाकारपदार्थशतपङ्क्तयः ।
तरङ्गणकल्लोलवीचयो वारिधेरिव ।। ३.९.६९



८३९.१५ स एवाऽन्यतयोदेति यत्पदार्थशतभ्रमैः ।
कटकाङ्गदकेयूरनूपुरैरिव काञ्चनम् ।। ३.९.७०
८३९.१६ यस्त्वमेकोऽवभासात्मा योऽहमेते जनाश्च ये ।
यश्च न त्वमबुद्धात्मा नाऽहं नैते जनाश्च यः ।। ३.९.७१
८३९.१७ अन्येवाऽप्यतिरिक्तेव सैवाऽसेव च भङ्गुरा ।
पयसीव तरङ्गाली यस्मात् स्फुरति दृश्यभूः ।। ३.९.७२
८३९.१८ यतः कालस्य कलना यतो दृश्यस्य दृश्यता ।
मानसी कलना येन यस्य भासा विभासनम् ।। ३.९.७३
८३९.१९ क्रियां रूपं रसं गन्धं शब्दं स्पर्शं च चेतनम् ।
यद्वेत्सि तदसौ देवो येन वेत्सि तदप्यसौ ।। ३.९.७४
८३९.२० द्रष्टृदर्शनदृश्यानां मध्ये यद्दर्शनं स्थितम् ।
साधो तदवधानेन स्वात्मानमवबुद्ध्यसे ।। ३.९.७५
८३९.२१ अजमजरमनाद्यं शाश्वतं ब्रह्म नित्यं
शिवममलममोघं वन्द्यमुच्चैरनिन्द्यम् ।
सकलकलनशून्यं कारणं कारणाना-
मनुभवनमवेद्यं वेदनं विश्वमंतः ।। ३.९.७६